# Raja Udayakritam Krishnanarayana Stotram

# રાજા ઉદયકૃતં કૃષ્ણનારાયણસ્તોત્રમ્

## Document Information

Text title : Raja Udayakritam Krishnanarayana Stotram

File name : rAjAudayakRRitaMkRRiShNanArAyaNastotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra, krishna

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 2 | adhyAya 60/52-85||

Latest update : February 5, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2026

*sanskritdocuments.org*

# રાજા ઉદયકૃતં કૃષ્ણનારાયણસ્તોત્રમ્

અથ સર્વં ક્ષણાલ્લીનં નૃપસ્ત્વાશ્ચર્યમાપ્તવાન્ ।
તતઃ ક્ષણાન્તરે નૈજોટજાં દદર્શ શોભનામ્ ॥ ૫૨॥

સ્વસ્થો ભૂત્વા દિશો નત્વા તુષ્ટાવ ધ્યાનસંસ્થિતઃ ।
ૐ નમઃ શ્રીનિવાસાય મૂલપ્રકૃતિયામિને ॥ ૫૩॥

અજિતાય ચ દેવાય મહાત્મને નમોઽસ્તુ તે ।
અનાશ્રિતાય શાન્તાય નિઃસ્પૃહાય નમોઽસ્તુ તે ॥ ૫૪॥

નમ આદ્યાય દેવાય સર્વદેવમયાય ચ ।
આર્ષાયાદિસ્વરૂપાય શ્રીકૃષ્ણાય ચ તે નમઃ ॥ ૫૫॥

અનન્તરાય ચૈકાય સદા વ્યક્તાય તે નમઃ ।
નમો ગુપ્તાય કાશાય ગુણેશ્વરાય તે નમઃ ॥ ૫૬॥

અતર્ક્યાયાઽપ્રમેયાય ચાતુલાય ચ તે નમઃ ।
નિશ્ચિન્તાય ચ પૂર્વાય સનાતનાય તે નમઃ ॥ ૫૭॥

પુરાણાય નમસ્તસ્મૈ નિર્ગુણાય નમોઽસ્તુ તે ।
નમો જગત્પ્રતિષ્ઠાય બ્રહ્મનિષ્ઠાય તે નમઃ ॥ ૫૮॥

પદ્મનાભાય યોગાય ગોવિન્દાય નમો નમઃ ।
નમોઽસ્તુ સાઙ્ખ્યવેદ્યાય વિશ્વેશ્વરાય તે નમઃ ॥ ૫૯॥

હરયે શિવરક્ષાય નારાયણાય તે નમઃ ।
પરાત્મનેઽમિતદાત્રેઽમિતક્રમાય તે નમઃ ॥ ૬૦॥

શાર્ઙ્ગચક્રગદાપદ્મશાલિને તે નમો નમઃ ।
મહોરગાય સિંહાય નમોઽસ્તુ વેદવાસિને ॥ ૬૧॥

મહામત્સ્યાય કાન્તાય કચ્છપાય ચ તે નમઃ ।
વામનાય ચ દીર્ઘાય ચતુર્ભુજાય તે નમઃ ॥ ૬૨॥

સિદ્ધચારણગન્ધર્વસંસ્તુતાય નમો નમઃ ।
અચ્યુતાય સકલાય નાગેન્દ્રશયનાય ચ ॥ ૬૩॥

દુગ્ધવર્ણાય કૃષ્ણાય હેમાભાય નમો નમઃ ।
પીતામ્બરાય દૈત્યાદિનાશનાય ચ તે નમઃ ॥ ૬૪॥

અક્ષરાયાઽક્ષરેશાય નાભિપદ્માય તે નમઃ ।
ચતુર્મુખાય દેવાય પઞ્ચવક્ત્રાય તે નમઃ ॥ ૬૫॥

ક્ષીરવાસાય યશસે કાન્તયે વરદાય ચ ।
સર્વેશ્વરાય કાન્તાય કામિનીશાય તે નમઃ ॥ ૬૬॥

વરેણ્યાય વિઘ્નહર્ત્રે ભક્તિપ્રિયાય તે નમઃ ।
પદ્માયતસુનેત્રાય શુકનાસાય શાર્ઙ્ગિણે ॥ ૬૭॥

યોગેશ્વરાય વૃક્ષાય શાખિને તે નમો નમઃ ।
દેવાયનાય મુનયે સાધવે તે નમો નમઃ ॥ ૬૮॥

મોહિનીરૂપભાસાય જીવવાસાય તે નમઃ ।
વારાહાય નૃસિંહાય શરભાય ચ તે નમઃ ॥ ૬૯॥

કૂટસ્થં સર્વહેતું ચ પુરુષં ચ પુરાતનમ્ ।
માયાકાન્તં ચેશકાન્તં સર્વકાન્તં નમામ્યહમ્ ॥ ૭૦॥

ક્ષેત્રજ્ઞં કાલમાયેશં વ્યૂહેશં મુક્તજીવકમ્ ।
વાસુદેવં સતીકાન્તં કૃષ્ણનારાયણં પ્રભુમ્ ॥ ૭૧॥

કમ્ભરાનન્દનં કૃષ્ણં ગોપાલકૃષ્ણબાલકમ્ ।
પરધામનિવાસં તં પુમુત્તમં નમામ્યહમ્ ॥ ૭૨॥

બ્રહ્મર્ષયો બ્રહ્મરૂપં યં વદન્તિ સનાતનમ્ ।
અક્ષરેશં ચ મુક્તેશં પ્રપદ્યે શરણં હરિમ્ ॥ ૭૩॥

શ્રીવત્સાઙ્કં શ્વેતપદ્મરેખં વિગુણહારકમ્ ।
ષોડશાદિચિહ્નશોભં પ્રપદ્યે શરણં પતિમ્ ॥ ૭૪॥

યત્ર વિશ્વં યશ્ચ વિશ્વે સર્વં યત્ર પ્રતિષ્ઠતે ।
પ્રભવં સર્વભૂતાનાં દિવ્યગુણં પરેશ્વરમ્ ॥ ૭૫॥

પ્રપદ્યે મુક્તસઙ્ગાનાં સાધૂનાં પરમાં ગતિમ્ ।
ભગવન્તં ચાત્મવાસં સ્ત્રીવાસં પુષ્કરેક્ષણમ્ ॥ ૭૬॥

શરણ્યં શરણં ભક્ત્યા પ્રપદ્યે ભક્તવત્સલમ્ ।
અન્તકાલે સમાગત્ય પ્રદર્શ્યાત્માનમેવ યઃ ॥ ૭૭॥

નૈજં ધામ નિજં ભક્તં નયત્યેવ પ્રભુઃ પરઃ ।
તં નમામિ પરં દેવં મોક્ષદં પુરુષોત્તમમ્ ॥ ૭૮॥

પાતાલાન્તં ચ સત્યાદિ સર્વં માતિ તુ યત્ર વૈ ।
મહામાયાન્તકં સર્વં યસ્મિન્ માતિ જનાર્દને ॥ ૭૯॥

ધામાનિ મુક્તકોટ્યશ્ચ યસ્મિન્ માન્તિ પરેશ્વરે ।
તં પ્રપદ્યે પરં કૃષ્ણં નારાયણં શ્રિયઃ પતિમ્ ॥ ૮૦॥

ન ત્વાં સ્તોતું તથા વેદ્મિ યથા ત્વં વર્તસે પ્રભો! ।
સ્વરૂપં ન યથાર્થં ચ વેદ્મિ વેદ્મિ તટસ્થકમ્ ॥ ૮૧॥

ત્વયા યત્ કૃષ્ણ કૃપયા કૃષ્ણનારાયણાત્મકમ્ ।
રૂપં પ્રદર્શિતં મહ્યં તપઃ ફલં કૃપાફલમ્ ॥ ૮૨॥

ધામ પ્રદર્શિતં ચાપિ તથા કુઙ્કુમવાપિકા ।
અશ્વપટ્ટસરશ્ચાપિ દર્શિતં લોમશાશ્રમમ્ ॥ ૮૩॥

સર્વં પુનઃ પુનર્નાથ દ્રષ્ટુમિચ્છામિ સેવયા ।
પ્રસન્નતાં સમિચ્છામિ તથા મે વરદો ભવ ॥ ૮૪॥

ઇત્યેવં સંસ્તુતોઽનાદિશ્રીમત્કૃષ્ણનરાયણઃ ।
સાન્નિધ્યં ચાજગામ દ્રાક્ ચક્રપદ્મધરઃ પ્રભુઃ ॥ ૮૫॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય ૬૦-અધ્યાયાન્તર્ગતં
રાજા ઉદયકૃતં કૃષ્ણનારાયણસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય ૬૦/૫૨-૮૫॥

lakShmInArAyaNIyasaMhitA . khaNDa 2. adhyAya 60/52-85..

Proofread by PSA Easwaran

*Raja Udayakritam Krishnanarayana Stotram*

pdf was typeset on February 5, 2026

Please send corrections to *sanskrit@cheerful.com*